# Kokilaksa

कण्टकी दीर्घपत्रश्च पल्वलेषु प्ररोहति । **(Shi.ni)**

Kantaki, Dirghapatra, Palvaleshu are the synonyms of Kokilaksa.

नादेयी चेक्षुरः पुण्ड्रः कण्टकी कोकिलाक्षकः ।
प्रोक्तः कोकिलपर्यायैरक्षिपर्यायपूर्वकैः ॥ **(Aa ma)**

Nadeyi, Iksura, Pundra, Kantaki, Kokilaksaka, Kokila are the synonyms of Kokilaksa.

कोकिलाक्षस्तु काकेक्षुरिक्षुरः क्षुरिका क्षुरः ।
भिक्षुः कण्डेक्षुरप्युक्ता इक्षुगन्धेक्षुबालिका ॥ **(Bpn)**

Kokilaksa is called as kakeksura, iksura, ksurika, ksura, bhiksu, kandeksu, iksugandha and balika.

कोकिलाक्षः शृङ्गाली च शृङ्खला रणकास्तथा ।
शृङ्गालघण्टी वज्रास्थिशृङ्खला वज्रकण्टकः ॥
इक्षुरः क्षुरको वज्रः शृङ्खलिका पिकेक्षण ।
पिच्छिला चेक्षुगन्धा ज्ञेया भुवनसम्मिता ॥ **(Rjn)**

Kokilaksa is also called as srungali, srunkhala, ranaka, srungalaghanti, vajrasthi, srunkhala, vajrakantaka, iksura, ksuraka, vajra, srunkhalika, pikekshana, picchila, iksugandha and bhuvana.

क्षुरकः शीतलो वृष्यः स्वाद्वम्लः पिच्छिलस्तथा ।
तिक्तो वातामशोफाश्मतृष्णादृष्ट्यनिलास्रजित् ॥ **(Bpn)**

Ksuraka is tikta, svadu, amla in rasa, sita in veerya, picchila in guna, vrsya, alleviates vata, cures ama, sopha, asma, trsna, drsti vikara, anila and asra vikara.

कोकिलाक्षस्तु मधुरः शीतः पित्तातिसारनुत् ।
वृष्यः कफहरो बल्यो रुच्यः सन्तर्पणः परः ॥ **(Rjn)**

Kokilaksa is madhura in rasa, sita in veerya, balya, rucya, vrsya, alleviates pitta and kapha cures atisara and santarpana.

कोकिलाक्षो मधुः शीतो रुच्यो बल्यो गुरुः स्मृतः ।
वृष्याऽम्लस्तर्पणस्तिक्तः स्वादु स्निग्धश्च चिक्कणः ॥
आढ्यवातामवातातिसातिसारतृष्णाश्मरीरुजः ।
वातास्त्रमेहशोफामरक्तरुङ्नाशनो मतः ॥
पित्तं च दृष्टिरोगं च नाशयेदिति कीर्त्तितः ।

पर्णं च स्वादु तिक्तं स्याच्छोपशुलविषापहम् ॥
आनाहवातमुदरं पाण्डुरोगं च नाशयेद् ।
बन्धञच मलमूत्राणां वातमेवं च नाशयेत् ॥

वृद्धस्य कोकिलाक्षस्य गुणास्त्वस्य समा मताः ।

कोकिलाक्षस्य बीजं तु शूतं स्वादु कषायकम् ॥
तिक्तं वृष्यं गुरुर्बल्यं ग्राहकं गर्भस्थापनम् ।
कफवातकरं चैव मलस्तम्भकरं तथा ॥
रक्तदोषं च दाहं च पित्तं चैव विनाशयेत् । **(Sgn)**

Kokilaksa is Madhura in Rasa, Sita in potency, Rucya, balya, guru in Property, Vrsya, Amla, Tikta, Svadu in Rasa, Tarpana, Snigdha in

Property, is Cikkana, cures Adhya vata, Amavata, Atisara, Trsna, Asmari ruja, Vata asra, Meha, Sopha, Ama, Rakta vikara, Pittam, Drsti roga.

Parna is Svadu, Tikta in Rasa, cures Sopha, Sula, Visha, Anaha, Vata udara, Pandu, Malamutra vibandha, Vata.

Vrddha Kokilaksa also has similar properties.

Its Bija is Sita in Potency, Svadu, Kashaya,Tikta, in Rasa, Vrsya, guru in Property, Balya, Grahi, garbhasthapana, Kapha Vata kara, Malastambha kara, cures Rakta dosha, Daha, Pitta.

क्षुरकः शीतलो वृष्यः मधुरः पिच्छिलो हिमः ।
स्निग्धः पित्तामशोफाश्मतृष्णादृष्ट्यनिलास्रजित् ॥ **(Dra.vi)**

Ksuraka is Sita in Potency, Vrsya, Madhura in rasa, Picchila in Property, Hima in Potency, Snighda, cures Pitta, Sopha, Asma, trsna, Drsti vikara, Anila nad Asra vikara.

कोकिलाक्षो हिमस्तिक्तः स्वाद्वम्लः स्निग्धपिच्छिलः ।
वृष्यो वातामवाताश्मतृष्णादृष्टिखुडास्रजित् ॥

इक्षुरस्य दलं स्वादु तिक्तं शोफविषापहम् ।
शूलपाण्डूदरानाहवातमूत्रविबन्धनुत् ॥ **(Kdn)**

Kokilaksa is Hima in Potency, Tikta, Svadu, Amla in Rasa, Snigdha, Picchila in Property, Vrsya, cures Vata, Ama vata, Asma, Trsna, Drsti roga, Khuda, Asra vikara.

Iksu rasa dala is Svadu, Tikta in Rasa, Sopha- Visha hara, cures Sula, Pandu, Udara, Anaha, Mutra vibandha.